

॥ श्रीः ॥

॥ हनुमद्द्वाविंशतिः ॥

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि
श्रीसच्चिदानन्दशिवाभिनव
नृसिंहभारतीस्वामिभिः
विरचिता ।



श्रीरङ्गस्थ
श्रीवाणीविलाससमुद्रायन्त्रालये
संमुद्रिता ।
१९०८.
Copyright Registered.



॥ हनुमद्द्वाविंशतिः ॥

यो बाल्येऽपि दिनेशं
प्रोद्यन्तं पक्वदिव्यफलबुद्ध्या ।
व्युदपतदाशु हि पुष्कर-
मादातुं नौमि तं समीरसुतम् ॥ १ ॥

लङ्कापुराधिदैवत-
गर्वं वेगाच्चपेटिकादानात् ।
निर्मूलं यश्चक्रे
वन्दे तं वायुसूनुममितबलम् ॥ २ ॥

योऽक्षकुमारप्रमुखान्
प्रवरान् दनुजान् जघान कुतुकेन ।
एकः सहायरहित-
स्तमहं प्रणमामि गन्धवहसूनुम् ॥ ३ ॥

ओषधिगिरिमतिवेगा-
द्गृत्वानीय प्रवृद्धदिव्यतनुः ।
यो लक्ष्मणासुदानं
चक्रे तं नौमि गरुडनिभवेगम् ॥ ४ ॥

गोष्पदवत्सरितांनिधि-
मुल्लङ्घ्याशोकविपिनगां सीताम् ।
अद्राक्षीद्भयरहितो
यस्तं प्रणमामि शिंशुपामूले ॥ ५ ॥

रामादेशश्रवणा-
नन्दादुद्भूतशोकगन्धां यः ।
सीतां चक्रे मतिमां-
स्तमहं प्रणमामि शोकविच्छित्त्यै ॥ ६ ॥

प्राप्य मणिं सीतायाः
कानननमसुरस्य सत्वरं भङ्क्त्वा ।
दग्ध्वा लङ्कां योऽगा-
द्रघुवरनिकटं स मामवतु ॥ ७ ॥

सीताप्रोदितवचना-
न्यशेषतो यो निवेद्य रघुवीरम् ।
चक्रे चिन्तारहितं
वन्दे तं चिन्तितार्थदं नमताम् ॥ ८ ॥

यस्मै भगवान् ब्रह्मा
प्रायच्छद्वायुतृप्तये पूर्वम् ।
विविधान् वरान् वरांस्तं
वन्दे दुर्ज्ञेयदिव्यमहिमानम् ॥ ९ ॥

कुण्डलभासिकपोलं
मण्डलमङ्घ्रिप्रणम्रजन्तूनाम् ।
कुर्वन्तमीप्सितार्थैः
सर्वैर्युक्तं भजेऽञ्जनासूनुम् ॥ १० ॥

रघुपतिमुखारविन्द-
स्रवदागमशीर्षतत्त्वमकरन्दम् ।
आपीयागलमनिशं
नन्दन्तं नौमि पवनमूलधनम् ॥ ११ ॥

पुरतो भव करुणाब्धे
भरताग्रजचरणलग्नचित्ताब्ज ।
हर मम निखिलां चिन्तां
करजितपाथोज कलितवटुरूप ॥ १२ ॥

रविसुतमन्त्रिवरेण्यं
पविताडनसहनदक्षदिव्यहनुम् ।
कविशिष्यहरणचतुरं
सवितृविनेयं नमामि वातसुतम् ॥ १३ ॥

कारुण्यजन्मभूमिं
काकुत्स्थाङ्घ्रयब्जपूजनासक्तम् ।
कालाहितभयरहितं
कामविदूरं नमामि कपिमुख्यम् ॥ १४ ॥

पुरदग्धारं मनसिज-
जेतारं रामनामरुचिविज्ञम् ।
हनुमन् भवन्तमीशं
वदति न कः प्रणतसर्वदोषसहम् ॥ १५ ॥

कनकाद्रिसदृशकायं
कनकप्रदमाशु नम्रजनपङ्क्तेः ।
रक्ताम्बुजास्यमीडे
सक्तान्तःकरणमिनकुलोत्तंसे ॥ १६ ॥

सुरदेशिकसदृशगिरं
करजैर्हीरस्य कठिनतागर्वम् ।
नरशृङ्गतां नयन्तं
नरमनिशं नौमि वाद्यमनिलसुतम् ॥ १७ ॥

वक्षस्ताडितशैलं
रक्षःपतिसैन्यमर्दनप्रवणम् ।
रक्षाकरं नमस्या-
म्यक्षाधिपदूतमनिलपुण्यचयम् ॥ १८ ॥

सुरसावदनं विपुलं
तरसा गत्वा विनिर्गतं दृष्ट्वा ।
यं सुरनिकरा विस्मय-
माजग्मुर्नौमि तं महाप्राज्ञम् ॥ १९ ॥

श्रीपारिजातपादप-
मूले वासं करोषि किं हनुमन् ।
अध्येतुमवनताखिल-
वाञ्छितदातृत्वमवनिजेट्दूत ॥ २० ॥

नयनजितहेमगर्वं
नयनयपारीणमञ्जनातनयम् ।
गतिविजितजनककीर्तिं
मतिमतिनिशितां ददन्तमहमीडे ॥ २१ ॥

समरे वक्षसि येन
प्रहतः संमूर्च्छितः ससंज्ञोऽथ ।
प्रशशंस रावणो यं
तमतिबलानन्दवर्धनं नौमि ॥ २२ ॥